श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ शेषपद्धतिः त्रयोविंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शेषपद्धतिः त्रयोविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सृष्टां भूमावनन्तेन नित्यं शेषसमाधिना।
अहं सम्भावयामि त्वामात्मानमिव पादुके !॥ २३.१ ॥

पद्माभोगात् पादुके ! रङ्गभर्तुः पादस्पर्शाद्भोगमन्यं प्रपित्सोः।
शेषस्यैकां भूमिकामब्रवीत् त्वां आचार्याणामग्रणीर्यामुनेयः॥ २३.२ ॥

शेषत्वमम्ब ! यदि संश्रयति प्रकामं
त्वद्भूमिकां समधिगम्य भुजङ्गराजः।
त्वामेव भक्तिविनतैर्वहतां शिरोभिः
काष्ठां गतं तदिह केशवपादरक्षे !॥ २३.३ ॥

मा भूदियं मयि निषण्णपदस्य नित्यं
विश्वंभरस्य वहनाद्व्यथितेति मत्वा।
धत्से बलाभ्यधिकया मणिपादुके ! त्वं
शेषात्मना वसुमतीं निजयैव मूर्त्या॥ २३.४ ॥

तत्तादृशा निजबलेन निरूढकीर्तिः
शेषस्तवैव परिणामविशेष एषः।
रामेण सत्यवचसा यदनन्यवाह्यां
वोढुं पुरा वसुमतीं भवती नियुक्ता॥ २३.५ ॥

शेषत्वसीमनियतां मणिपादरक्षे !
त्वामागमाः कुलवधूमिव बालपुत्राः।
त्वद्रूपभेदशयितस्य परस्य पुंसः
पादोपधानशयितामुपधानयन्ति॥ २३.६ ॥

भरतशिरसि लग्नां पादुके ! दूरतस्त्वां
स्वतनुमपि ववन्दे लक्ष्मणः शेषभूतः।
किमिदमिह विचित्रं नित्ययुक्तः सिषेवे
दशरथतनयः सन् रङ्गनाथः स्वमेव॥ २३.७ ॥

भूयोभूयः स्तिमितचलिते यस्य सङ्कल्पसिन्धौ
ब्रह्मेशानप्रभृतय इमे बुद्बुदत्वं भजन्ति।
तस्यानादेर्युगपरिणतौ योगनिद्रानुरूपं
क्रीडातल्पं किमपि तनुते पादुके ! भूमिकाऽन्या॥ २३.८ ॥

अहीनात्मा रङ्गक्षितिरमणपादावनि ! सदा
सतामित्थं त्राणात् प्रथितनिजसत्रत्वविभवा।
अविद्यायामिन्याः स्पृशसि पुनरेकाहपदवीं
क्रतूनामाराध्या क्रतुरपि च सर्वस्त्वमसि नः॥ २३.९ ॥

बहुमुखभोगसमेतैर्निर्मुक्ततया विशुद्धिमापन्नैः।
शेषात्मिका पदावनि ! निषेव्यसे शेषभूतैस्त्वम्॥ २३.१० ॥

॥ इति श्रीपादुकासहस्रे शेषपद्धतिः त्रयोविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥